दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-9 ■ वर्ष-5 ■ अङ्क-298 | 1 | अगस्त 17, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणशुक्लपञ्चमी
भाद्रपद 01 प्रविष्ठांशः मङ्गलमयः भवेत्

2 सेनाध्यक्षः जनरल धीरज सेठः नेपालदेशस्य आधिकारिकयात्राम् आरब्धवान्

3 ऐतिहासिके 'रिज' प्राङ्गणे मुख्यमन्त्री सुक्खुवर्यः अटलबिहारीवाजपेयी-महोदयाय अयच्छत् श्रद्धाञ्जलिम्,

9 श्रावणसोमवारस्य, नागपञ्चम्याः, सिंहसङ्क्रान्तेश्च त्रिवेणीसंयोगः शिवोपासनायाः नाग-तत्त्वाराधनायाश्च अनुपमः अवसरः

## युवानः,महिलाः, कृषकाः, निर्धनजनाः च सबलाः भवेयुः - अमितशाहः



केन्द्रीय-गृह-मन्त्री श्रीअमितशाहः उक्तवान् यत् युवानः,, महिलाः, कृषकाः, निर्धनजनाः च सबलाः भवेयुः इति आवश्यकम् अस्ति, येन सप्तचत्वारिंशदधिकद्विसहस्रवर्षे यावत् भारत-राष्ट्र पूर्णतया विकसित देशः भवितुम् अर्हति। सः अवदत् यत् नरेन्द्र-मोदी-सर्वकारः एतेषां वर्गाणां कल्याणे विकासे च विशेष ध्यानं ददाति। श्रीशाहः राजस्थान-राज्यस्य अलवर-नगरे एकं कार्यक्रमम् सम्बोधयन् आसीत्। तेन राज्यस्य सप्तदशसु जनपदेषु त्रिपञ्चाशदधिकचतुश्शतोत्तर-षट्सहस्र' कोटि-रूप्यकाणां विकास-परियोजनानां शिलान्यासं उद्घाटनं च कृतम्। तेन कथितम् यत् सर्वकारेण कृषकाणां कल्याणाय अनेकाः योजनाः प्रारब्धाः। सः अवदत् यत् चतुर्दशोत्तरद्विसहस्रतम् वर्षात् षड्विंशत्युत्तरद्विसहस्रतमं वर्षं यावत् मोदी सरकारेण कृषकाणां कृते बृहत्-योजनाः प्रवर्तिताः, न्यूनतम समर्थन मूल्यं च निरन्तरं वर्धितम् इति।

## अद्यतनीयं सुभाषितम्

**आभ्यन्तराद्भयं रक्षेत् सुरक्षेद्बाह्यते भयम्।**
**आभ्यन्तराद्भयं जातं, सद्यो मूलं निकृन्तति।।**

भावार्थ- हमें अपने मन के अन्दर उत्पन्न होने वाले भय से अपनी रक्षा करनी चाहिए तथा बाहरी भयों से भी अच्छी तरह अपनी रक्षा करनी चहिए, यदि हमारा आन्तरिक भय दूर हो जाए तो भय की भावना ही तुरन्त समूल नष्ट हो जाती है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## राष्ट्रपतिः, उपराष्ट्रपतिः, प्रधानमन्त्री च पूर्व-प्रधानमन्त्रिणः अटलबिहारी वाजपेयी-वर्यस्य स्मारके पुष्पांजलिम् अर्पितवन्तः



राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्वर्यः, प्रधानमन्त्री नरेन्द्रमोदी च राष्ट्रिय-राजधान्यां पूर्व-प्रधानमन्त्रिणः अटलबिहारी वाजपेयी-वर्यस्य स्मारके सदैव अलि-इत्यत्र पुष्पांजलिम् अर्पितवन्तः। पूर्वराष्ट्रपतिः रामनाथकोविन्दः, राज्यसभायाः उपसभापतिः हरिवंशः, लोकसभाध्यक्षः ओम बिरला, केन्द्रीयमन्त्री राजनाथसिंहः, दिल्ल्याः मुख्यमन्त्री रेखा गुप्ता, भाजपेति दलस्य राष्ट्रिय-अध्यक्षः नितिन नबीनः च अस्मिन् अवसरे उपस्थिताः आसन्।

## झारखण्ड-राज्ये जे. पी. एस्. सी. जे. एस्. एस्. सी. अभ्यर्थिनां नियुक्ति-परीक्षासु अभिकथित-अनियमिततायाः विषये आन्दोलनं तीव्रतरं जातम्

झारखण्ड-राज्ये जे. पी. एस्. सी. जे. एस्. एस्. सी. अभ्यर्थिनां नियुक्ति परीक्षासु अभिकथित अनियमिततायाः विषये आन्दोलनं तीव्रतरं जातम् अस्ति, यत्र प्रथमवारं मुख्यमन्त्रिणः हेमन्त-सोरेन इत्यस्यापि त्यागपत्रस्य आग्रहः कृतः अस्ति। यदा विरोधः द्वाविंशे दिने प्रविष्टः तदा छात्रनेत्रिणः अवदन् यत् तेषां प्रमुखाः याचनाः अनुत्तरिताः एव सन्ति इति। जे. पी. एस्. सी. जे. एस्. एस्. सी. परिष्कार-मञ्चः अगस्त-मासस्य अष्टादश-दिनाङ्कात् पूर्वं सकारात्मकं कार्यं कर्तुं राज्यसर्वकाराय सञ्चेतितवान्। ते आगस्त्मासस्य विंशे दिनाङ्के मुख्यमन्त्री-निवासात् बहिः प्रमुखं विरोधं अघोषयन्, यदि तेषां याचनानां निराकरणं न भवति तर्हि तत्र आन्दोलनम् अनुवर्तयिष्यन्तीति च उक्तवन्तः।


## राष्ट्रीय-परीक्षा-अभिकरण (एनटीए) इत्यनेन यूजीसी नेट इति परीक्षायाः चतुरशीति-विषयेभ्यः अस्थायीत्वेन उत्तर-कुंजिकाः प्रकाशिताः

राष्ट्रीय-परीक्षा-अभिकरण (एनटीए) इत्यनेन यूजीसी नेट इति अस्य वर्षस्य जूनमासीयायाः परीक्षायाः चतुरशीति-विषयेभ्यः अस्थायीत्वेन उत्तर-कुंजिकाः प्रकाशिताः। एन्. टी. ए. इत्यनेन प्रतिवादगवाक्षोऽपि उद्घाटितः, यो हि अगस्त-मासस्य अष्टादश-दिनाङ्कपर्यन्तं भविष्यति। अभ्यर्थिनः आधिकारिकस्य यू. जी. सी. नेट पोर्टल् इत्यनेन ऑन्लायन्-माध्यमेन उत्तरतालिकां चालयितुं शक्नुवन्ति। प्रक्रियाशुल्क-देयस्य अन्तिमतिथिः अस्य मासस्य अष्टादश-दिनाङ्कः अस्ति।

## राष्ट्रिय गीतस्य वन्दे मातरम् इत्यस्य विरोधं काङ्ग्रेस्-पक्षेन कृतम् इति आरोपः



स्वतन्त्रतादिवसस्य अवसरे राष्ट्रिय गीतस्य वंदे मातरम् इत्यस्य विरोधं काङ्ग्रेस्-पक्षेन कृतम् इति भाजपेति दलेन आरोपः कृतः। नवदेहली-नगरे पत्रकारसम्मेलनं सम्बोधयन् भाजपा-पक्षस्य प्रवक्ता प्रदीपभण्डारी इत्यनेन आरोपः कृतः यत् काङ्ग्रेस्-मुख्यालये स्वातन्त्र्यदिनाचरणस्य समये काङ्ग्रेस्-पक्षस्य वरिष्ठा नेत्री सोनिया गान्धी वंदे मातरम् इत्यस्य प्रस्तुतीकरणं निवारयितुं प्रायतत इति। सः अकथयत् यत् काङ्ग्रेस्-पक्षः न केवलं राष्ट्रगीतस्य अपितु संविधानस्य अपि च देशस्य जनानां अपि अपमानम् अकरोत् । भाजपा-पक्षस्य आरोपविषये काङ्ग्रेस्-पक्षस्य प्रवक्ता जयराम रमेशः अवदत् यत् स्वातन्त्र्य-दिवसस्य उत्सवस्य समये दलस्य मुख्यालये राष्ट्रिय-गीतं वन्दे मातरम् सम्पूर्णतया गीयते स्म ।




## अद्यारभ्य नवदेहल्यां बीडब्ल्यूएफ विश्व-चैम्पियनशिप-स्पर्धायाः भविष्यति शुभारम्भः

भारत-देशः सोमवासरतः अगस्त-मासस्य त्रयोविंशत्यधिकतमं दिनं यावत् नव-दिल्ली-नगरे स्थिते "इन्दिरा गान्धी-स्टेडियम्" इति स्थाने बीडब्ल्यूएफ विश्व-चैम्पियनशिप-स्पर्धाम् आयोजयिष्यति। नवाधिकद्विसहस्रतमवर्षस्य स्पर्धायाः अनन्तरमिदं द्वितीयवारं यदा भारतदेशः एतां स्पर्धाम् आयोजयति।

## भारतीयदलं महिला-हॉकी-विश्व-चषके चीन-देशं विरुध्य स्व-अभियानम् आरब्धवत्

हॉकी-क्रीडायाम् भारतीय-महिला-दलम् FIH महिला-हॉकी-विश्व-चषके चीन-देशं विरुध्य स्व-अभियानम् आरब्धवत्। "D" समूहस्य स्पर्धा अधुना नीदरलैण्ड्स-देशस्य एम्स्टेलवीन-नगरे स्थिते "वैगनर-स्टेडियम्" इति स्थाने प्रचलति।

# जयरामठाकुरस्य मुख्यमन्त्री सुक्खुविरुद्धं प्रहारः,

## उक्तवान्- "राष्ट्रीमञ्चस्य कृतः राजनैतिकः दुरुपयोगः"

**हिमसंस्कृतवार्ताः- शिमला।** भूतपूर्वमुख्यमन्त्री, विपक्षनेता च जयरामठाकुरः मुख्यमन्त्रिणं सुखविन्दरसिंह-सुक्खुं प्रति स्वातन्त्र्यदिवससदृशस्य राष्ट्रियमहत्त्वपूर्णमञ्चस्य राजनैतिक-दुरुपयोगकरणस्य आरोपम् अकरोत्। रविवासरे भाजपा-प्रदेशकार्यालये 'दीपकमल' इत्याख्ये ध्वजारोहणानन्तरं वार्ताहरैः सह सम्भाषणे जयरामठाकुरः अवदत् यत् मुख्यमन्त्री राष्ट्रिय-महत्त्वपूर्णमञ्चानाम् उपयोगं स्वकीयां राजनैतिकप्रतिशोधभावनां निष्कासयितुं व्यक्तिगतप्रचाराय च करोति। जयरामठाकुरः आरोपम् अकरोत् यत् स्वातन्त्र्यदिवसस्य कार्यक्रमेषु शिक्षणसंस्थाः अपि राजनैतिकप्रचारस्य माध्यमं कृताः। सः अवदत् यत् १५ अगस्त-दिवसः देशस्य स्वातन्त्र्यसेनानीनां सङ्घर्षं बलिदानं च स्मर्तुं दिवसः अस्ति। एतादृशे अवसरे बालकेभ्यः देशस्य स्वातन्त्र्याय कृतस्य सङ्घर्षस्य विषये सूचना दातव्या, न तु कस्यचित् नेतुः छवेः संवर्धनाय कार्यक्रमाणां दुरुपयोगः भवेत्।

सः अकथयत् यत् विद्यालयेषु मुख्यमन्त्रिणा आपदाकाले कृतानां कार्याणां प्रदर्शनस्य कः औचित्यः आसीत्? विपक्षनेता व्यङ्ग्यं कुर्वन् अवदत् यत् जनतायाः सर्वकारतः मोहभङ्गः जातः अस्ति, अधुना च क्षुद्रबालानां साहाय्येन मुख्यमन्त्री स्वछविं शोधयितुं प्रयतते। सः अवदत् यत् जनतायाः हृदयेषु स्थानं कर्मणा निर्मीयते, किन्तु वर्तमानसर्वकारः कार्यकरणस्य स्थाने पिधाने (तालाबन्दी-करणे) विश्वसिति।

### कर्मचारिणां पेन्शनभोगिनां च विषयेऽपि आक्रमणम्

जयरामठाकुरः कर्मचारिणां पेन्शनभोगिनां च अभ्यर्थनानां विषयेऽपि प्रदेशसर्वकारस्योपरि प्रहारम् अकरोत्। सः आरोपम् अकरोत् यत् मुख्यमन्त्री निरन्तरम् आश्वासनं ददाति, किन्तु कर्मचारिणां निवृत्तवेतनभोगिनां च समस्यानां समाधानं न जायते। सः अकथयत् यत् प्रदेशस्य दुर्बलाम् आर्थिकस्थितिं सूचयित्वा अनाथ-विधवानां नाम्ना तैले (पेट्रोल-डीजल) उपकरः आरोपितः। जयरामठाकुरस्य मते, हिमाचलसदृशे पर्वतीयराज्ये पूर्वमेव इन्धनस्य महार्घत्वात् परिवहनव्ययः वर्धते, अस्य च प्रत्यक्षः प्रभावः दैनिकोपयोगिवस्तूनां मूल्येषु भवति। सः सम्पूर्णप्रदेशे एचआरटीसी-कर्मचारिणां, सर्वकारिकर्मचारिणां, पेन्शनभोगिनां च विरोधाभिव्यक्तीनां उल्लेखं कुर्वन् अवदत् यत् सर्वकारस्य विश्वसनीयता समाप्ता जाता। सः आरोपम् अकरोत् यत् काङ्ग्रेससर्वकारस्य निर्वाचनप्रतिज्ञाः, आयव्ययकघोषणाः, प्रतिश्रुतयः च यथार्थधरातले न दृश्यन्ते।



### बड़सर-विद्यालयविवादेऽपि आक्षेपः

विपक्षनेता बड़सरक्षेत्रे विद्यालयकार्यक्रमस्य अनुमती सम्बद्धे विषयेऽपि सर्वकारस्योपरि कटाक्षम् अकरोत्। सः अवदत् यत् स्वयम् विधिविद्यार्थिनं कथयतः मुख्यमन्त्रिणः कार्यकाले विद्यालये कार्यक्रमस्य आयोजनार्थम् अनुमतिं प्राप्तुं उच्चन्यायालयस्य द्वारं ताडनस्थितिः उत्पन्ना, या सर्वकारस्य कृते गम्भीराणि प्रश्नानि समुत्थापयति।

### अटलबिहारीवाजपेयी-महोदयस्य स्मरणम्

इतः पूर्वं रविवासरे प्रातःकाले जयरामठाकुरः शिमलायाः 'रिज' इत्याख्ये प्राङ्गणे भूतपूर्वप्रधानमन्त्रिणे भारतरत्नविभूषिताय अटलबिहारी वाजपेयीमहोदयाय तस्य पुण्यतिथौ श्रद्धासुमानि समर्पितवान्। सः अटलबिहारी वाजपेयीमहोदयं हिमाचलाय विशेषयोगदानप्रदाता नेता इति अवदत्। जयरामठाकुरः अकथयत् यत् 'अटल-सुरङ्गस्य' (अटल-टनल) स्वप्नं दृष्टवतः अटलबिहारी वाजपेयीमहोदयस्य हिमाचलेन सह विशेषः स्नेहः आसीत्। सः अवदत् यत् 'प्रधानमन्त्री ग्राम- सडक-योजना' इत्यस्य माध्यमेन प्रदेशे विपुलानां मार्गाणां निर्माणस्य मार्गः प्रशस्तः जातः। जयरामठाकुरः अकथयत् यत् अटलबिहारी वाजपेयीमहोदयः हिमाचलं स्वगृहं मन्यते स्म, सः सत्तायां वर्तमानः, विपक्षे वर्तमानः चापि निरन्तरं मनाली-क्षेत्रस्य 'प्रीणी' ग्रामम् आगच्छति स्म।

# सेनाध्यक्षः जनरल धीरज सेठः नेपालदेशस्य आधिकारिकयात्राम् आरब्धवान्



सेनाध्यक्षः जनरल धीरज सेठः नेपालदेशस्य आधिकारिकयात्राम् आरब्धवान्। त्रिदिवसीयायाः यात्रायाः उद्देश्यमस्ति यत् भारत-नेपालयोर्मध्ये निकट-रक्षा-सहकारः, सैन्य-सम्बन्धः च इतोऽपि सुदृढः भवेत्। जनरल् सेठः तुण्डीखेल्-नगरस्य सेनामण्डपे पुष्पमालां समर्पयिष्यति, नेपालीसेना-मुख्यालये गाई-आफ्-आनर् इति सम्मानञ्च प्राप्स्यति। सः नेपाली सेनायाः सेनाध्यक्षेन सह संवादमपि करिष्यति। रक्षामन्त्रालयः अवदत् यत्, भारतनेपालयोर्मध्ये ऐतिहासिकं, सामाजिकं, सांस्कृतिकञ्च सम्बन्धाः सन्ति, यद्धि विश्वस्मिन् अतुल्यमेव दृश्यते।

## इन्डोनेशिया-कम्पः आपत्कालश्च

इण्डोनेशिया-देशे फ्लोर्स-तटस्य समीपे दशमलवसप्तोत्तरसप्त-तीव्रतायां भूकम्पानन्तरं पूर्व-नुसा-तेङ्गरा-प्रान्ते चतुर्दश-दिवसानां आपत्कालीनप्रतिक्रिया अवधिः घोषितास्ति।

## केरलम-राज्यस्य बृहत्तमः वार्षिकः पर्व "थिरुवोनम्" अगस्त-मासस्य षड्विंशत्यधिकतमे दिने आचरिष्यते

केरलम-राज्ये पर्व-वातावरणं निर्मीयते, यतः राज्यस्य बृहत्तमः वार्षिकः पर्व "थिरुवोनम्" अगस्त-मासस्य षड्विंशत्यधिकतमे दिने आचरिष्यते। ओणम-पर्व अद्य "अथम्" दिवसात् आरभ्यते। अथम्-दिवसस्य विशेष-आकर्षणं "अथा-पूक्कलम्" अस्ति, यत् गृहेषु निर्मीयमाणं वर्ण-चित्रितं पुष्प-आस्तरणम् अस्ति। सबरीमला-तीर्थे अपि मन्दिरम् अद्य मासिक-पूजायै उद्घाटिष्यते, तथा च विशेष-ओणम्-पूजा अगस्त चतुर्विंशत्यधिकतः अष्टाविंशत्यधिकं यावत् भविष्यति।

## अरुणाचल प्रदेशे, गाङ्गीय-पश्चिम बङ्गे, ओडिशा-राज्ये, उत्तर-प्रदेशे च उत्तराखण्डे च अतीव-वर्षायै "नारङ्ग-वर्णस्य" संचेतना

भारतीय-ऋतु-विज्ञान-विभागः (IMD) अरुणाचल प्रदेशे, गाङ्गीय-पश्चिम बङ्गे, ओडिशा-राज्ये, उत्तर-प्रदेशे च उत्तराखण्डे च अतीव-वर्षायै "नारङ्ग-वर्णस्य" संचेतना प्रसारितवान्। हिमाचल प्रदेशे, जम्मू-काश्मीरे, कोंकण-क्षेत्रे, गोवा-राज्ये, महाराष्ट्रे, मध्य-प्रदेशे, उत्तर-पूर्व-भारतस्य च केषुचित् भागेषु अपि तीव्र वर्षा सम्भाविता। दिल्ली-नगराय तु ऋतु-विज्ञान-विभागेन अद्य सायंकालात् रात्रि यावत् अतीव अल्पात् अल्पा-वर्षा अनुमिता।

## पूर्वप्रधानमन्त्रिणे भारतरत्न-स्व०-अटलबिहारीवाजपेयी-महोदयाय समर्पिता भावपूर्णा श्रद्धांजलिः



**पाटलिपुत्रम् (हिमसंस्कृतवार्ता):**

प्रेषकः राघव नाथ झा भारतरत्न-विभूषितस्य पूर्वप्रधानमन्त्रिणः स्व० अटलबिहारीवाजपेयी-महोदयस्य पुण्यतिथौ राज्यपालः लेफ्टिनेण्ट्-जनरल् (निवृत्तः) सैयद-अता-हसनैन-महोदयः तथा मुख्यमन्त्री सम्राटचौधरी च पाटलिपुत्र-उद्याने (पाटलिपुत्रा पार्क) स्थितायां तस्य आदमकद-प्रतिमायाम् (पूर्णकायायां प्रतिमायां) माल्यार्पणं कृत्वा भावभीनीं श्रद्धांजलिं समार्पयताम्।

अस्मिन् अवसरे ग्रामविकासमन्त्री श्रवणकुमारः, कृषिमन्त्री विजयकुमारसिंहः, सहकारितामन्त्री रामकृपालयादवः, कला-संस्कृतिमन्त्री डॉ० प्रमोदकुमारः, सांसदः रविशङ्करप्रसादः, भाजपा-प्रदेशाध्यक्षः सह-विधायकः सञ्जयसरावगी, विधायकः रत्नेशकुशवाहः, विधायकः सञ्जयकुमारगुप्तः, विधानपरिषद-सदस्या कुमुदवर्मा च अन्यान् जनप्रतिनिधीन् सामाजिककार्यकर्तॄंश्च सहिताः स्व० अटलबिहारीवाजपेयी-महोदयस्य प्रतिमायां पुष्पाणि समर्प्य स्वश्रद्धाञ्जलिं प्राकटयन्।

अमुं पावनमवसरम् अवलम्ब्य सूचना-जनसम्पर्कविभागस्य कलाकारैः आरती-पूजनं, राष्ट्रियगीतं, राष्ट्रगानं, बिहारगीतं देशभक्तिगीतानि च सुमधुरस्वरेण प्रस्तुतानि।

# ऐतिहासिके 'रिज' प्राङ्गणे मुख्यमन्त्री सुक्खूवर्यः अटलबिहारीवाजपेयी-महोदयाय अयच्छत् श्रद्धाञ्जलिम्,



## हिमाचलेन सह आत्मीयतां संस्मृतवान्

हिमसंस्कृतवार्ता:- शिमला। पूर्व-प्रधानमन्त्रिणः भारतरत्नस्य अटलबिहारी- वाजपेयीमहोदयस्य पुण्यतिथौ मुख्यमन्त्री ठाकुर-सुखविन्दरसिंहसुक्खूमहोदयः शिमलायाः 'रिज' मैदाने तस्मै श्रद्धाञ्जलिं समर्पितवान्। मुख्यमन्त्रिणा वाजपेयी-महोदयस्य चित्रे पुष्पाणि समर्प्य देशाय हिमाचलप्रदेशाय च तस्य योगदानं संस्मृतम्। मुख्यमन्त्रिणा सुक्खूमहोदयेन उक्तं यत् अटलबिहारीवाजपेयी-महोदयस्य हिमाचलप्रदेशेन सह विशिष्टः आत्मीयः सम्बन्धः आसीत्। सः मनालीस्थिते स्व-आवासे समये समये विश्रान्तिं यापयितुम् आगच्छति स्म। हिमाचलस्य प्राकृतिकसौन्दर्येण सह तस्य प्रगाढः अनुरागः आसीत्।

मुख्यमन्त्रिणा प्रोक्तं यत् वाजपेयीमहोदयः तादृश्यां राजनीतौ विश्वसिति स्म, यस्यां सर्वान् सह नीत्वा अग्रे गमनस्य भावना आसीत्। तेन उक्तं यत् वर्त्तमाने राजनैतिकयुगे तादृशी राजनीतिः न्यूना दृश्यते। देशस्य विकासे पूर्वप्रधानमन्त्रिणः योगदानं सर्वदा संस्मरिष्यते। तेन उक्तं यत् वाजपेयीमहोदयेन देशेन सहैव हिमाचलप्रदेशस्य विकासे अपि महत्त्वपूर्णा भूमिका निर्व्यूढा। तस्य पुण्यतिथौ सम्पूर्णे देशे सः श्रद्धया संस्मर्यते। अस्मिन् अवसरे सूचना-जनसम्पर्क- विभागस्य कलाकारैः देशभक्तिगीतानि प्रस्तुतानि। कार्यक्रमे पूर्वमन्त्री सुरेशभारद्वाजः, नगरनिगम- शिमलायाः महापौरः सुरेन्द्रचौहानः, उप-महापौरा उमाकौशलः, 'हिमुडा' उपाध्यक्षः यशवन्तछाजटा, पार्षदाः, उपायुक्तः शिमला अनुपमकश्यपः, नगरनिगमशिमला- आयुक्तः सचिनकँवलः अन्ये च गण्यमान्याः जनाः अपि अटलबिहारी- वाजपेयीमहोदयाय श्रद्धाकुसुमानि समर्पयन्।

# बालानां याचनया निर्मितः विद्यालयः, अधुना प्रियङ्का-गान्धी करिष्यति उद्घाटनम्; मुख्यमन्त्री सुक्खू-वर्यः अवदत् — वैयक्तिकः प्रवासः

**हिमसंस्कृतवार्ताः — शिमला** काङ्ग्रेस-संसद-सदस्यायाः प्रियङ्का-गान्धी-वाड्रा-वर्यायाः हिमाचलप्रदेश-प्रवासमधिकृत्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः स्पष्टीकृतवान् यत् एषः तस्याः कोऽपि आधिकारिकः कार्यक्रमः नास्ति। मुख्यमन्त्रिणा उक्तं यत् प्रियङ्का-गान्धी वैयक्तिक-प्रवासेन हिमाचलम् आगता अस्ति अस्मिन्नेव काले सा एकस्य विद्यालय-भवनस्य उद्घाटनं करिष्यति।

मुख्यमन्त्रिणः सुक्खू-महोदयस्य अनुसारम् एषा सैव विद्यालय-परियोजना अस्ति, यां प्रारब्धुं प्रियङ्का-गान्धी-वर्या निर्देशान् दत्तवती आसीत्। तेन विज्ञापितं यत् आपदा-काले प्रियङ्का-गान्धी सम्बद्ध-क्षेत्रस्य प्रवासं कृतवती आसीत्। तस्मिन् समये तत्रत्याः विद्यालयस्य बालकाः तया सह नूतन-विद्यालय-भवनं निर्मातुं प्रार्थनां कृतवन्तः आसन्।

मुख्यमन्त्रिणा उक्तं यत् बालानां याचनायाः अनन्तरं विद्यालय-भवन-निर्माणस्य दिशि कार्यं कृतम् अधुना च भवनं सज्जीकृतं वर्तते। प्रियङ्का-गान्धी अस्यैव भवनस्य उद्घाटनं कर्तुं प्राप्स्यति।

सुक्खू-महोदयेन उक्तं यत् प्रियङ्का-गान्धी-वर्यायाः एषः प्रवासः सर्वकारस्य पक्षतः कस्यापि आधिकारिक-कार्यक्रमस्य रूपेण न निर्धारितः। सा वैयक्तिक-रूपेण विद्यालयं प्राप्य बालकैः सह मेलनं करिष्यति तैः सह सम्भाषणं कृत्वा च प्रतिनिवर्तिष्यति।

मुख्यमन्त्रिणा एतदपि स्पष्टीकृतं यत् प्रियङ्का-गान्धी-वर्यायाः कार्यक्रमः मुख्य-रूपेण बालकैः सह संवादेन सज्जीकृत-विद्यालय-भवनस्य उद्घाटनेन च परिसीमितः अस्ति। तस्याः प्रवासमधिकृत्य कस्यापि सर्वकारीय-समारोहस्य आयोजनं न कृतम् अस्ति।



## डीएवी पब्लिक स्कूल स्वांग विद्यालयस्य प्राङ्गणे अति उत्साहेन आचरितः स्वतंत्रतोत्सवः

हिमसंस्कृतवार्ता। डीएवी पब्लिक स्कूल स्वांग विद्यालयस्य प्राङ्गणे अति उत्साहेन स्वतंत्रता दिवसस्य अशीतितमः समारोहः आचरितः। समारोहस्य मुख्यातिथिः कथारा क्षेत्रस्य महाप्रबंधकः श्रीमान् ए०बी०के० सिंह महाभागः ध्वजारोहणमकरोत्। विद्यालयस्य कुशल मार्गदर्शकः ऊर्जावान् यशस्वी प्राचार्यः श्री अनुज कुमार मिश्र महोदयः समारोहे उपस्थित- अभिभावकानां गणमान्यजनानां हृदयेन अभिनन्दनं कृतवान्। स्वौजस्वीवाणीभिः जनसमूहस्य हृदयमजयत्। अस्मिन् अवसरे अतीव हृदयस्पर्शी सांस्कृतिक कार्यक्रमस्य आयोजनं प्रस्तुतमासीत्। अभिभावकैः आयोजनस्य भूरि प्रशंसा कृता। प्राचार्य महोदयेन उक्तं यत् विद्यालयस्म सर्वांगीण विकासाय वयं कटिबद्धाः स्मः। भवतां आशीर्वादस्य अपेक्षा वर्त्तते विद्यालयः निरन्तरमुन्नतिं प्राप्स्यति इति मम विश्वासः। समारोहः सुचारू रूपेण सम्पन्नः जातः। अन्ते प्राचार्य महोदयेन सर्वेषां शिक्षकाणां कर्मचारीणां च कार्यस्य प्रशंसाम् कृत्वा उत्साहवर्धनमपि कृतवान्।

# काङ्गड़ामण्डले महती वर्षा उद्वेगेन प्रवहन्त्यां खोली-उपनद्यां प्रवाहितः पुरुषः, जनाः चलच्चित्रं रचयन्तः स्थिताः न केनापि कृतं साहसम्



हिमसंस्कृतवार्ताः- काङ्गड़ा। हिमाचलप्रदेशस्य काङ्गड़ामण्डले रविवासरे अपराह्णे महती वर्षा अभवत्। अस्मात् कारणात् नदीभ्यः उपनदीभ्यश्च अकस्मात् जलस्य उद्वेगः जातः। शाहपुरस्य पुहाड़ाक्षेत्रे खोली- उपनद्यां तीव्र- जलप्रवाहे कश्चन अज्ञातः पुरुषः प्रवाहितः दृश्यमानः आसीत्। जलस्य वेगः अतीव तीव्रः आसीत् इति कारणात् जनाः तं निष्कासयितुं साहसं कर्तुं न अशक्नुवन्, किन्तु चलच्चित्रे स्पष्टं दृश्यते यत् एकः पुरुषः तीव्र-जलप्रवाहे वहति।

पुहाड़ा-क्षेत्रात् परम् अधः झीरबल्ला-स्थाने अपि जनैः सः दृष्टः। अत्र जल-प्रवाहः इतोऽपि तीव्रः आसीत्, येन जनाः तं निष्कासयितुम् असमर्थाः आसन्।

### विधायकः पुलिस-दलञ्च घटना-स्थलम् प्राप्तौ

उपमुख्यसचेतकः शाहपुरस्य विधायकः केवलसिंहपठानियामहोदयः स्थानीय- पुलिसदलेन सह स्थलम् उपगम्य स्थितेः समीक्षां कृतवान्। विधायकेन उक्तं यत् उपनद्यां जल-प्रवाहस्य अत्यधिक- तीव्रतायाः कारणात् पुरुषस्य सद्यः अभिज्ञानं) न सम्भवम् अभवत् तस्य निष्कासने अपि काठिन्यं सम्मुखम् आयातम्।

### मण्डल-प्रशासनाय दत्ताः निर्देशाः-

घटनां गम्भीरतया गृह्णन् विधायकः पठानियामहोदयः मण्डल-पुलिसप्रशासनेन जिलाधीश- महोदयेन च सह दूरभाष-माध्यमेन सम्भाषणं कृत्वा आवश्यक-दिशा-निर्देशान् अददात्। तेन प्रशासनं निर्देशितं यत् साहाय्यरक्षणकार्ये तीव्रताम् आनीय उपनद्यां प्रवाहितस्य पुरुषस्य अन्वेषणं कृत्वा सः बहिः निष्कास्यताम् तथा च तस्य अभिज्ञानं निश्चितं कृत्वा नियमानुसारं पार्थिवशरीरं परिजनेभ्यः समर्पयितुं कार्याचरणा क्रियताम्।

विधायकेन प्रशासनस्य पुलिस-विभागस्य च अधिकारिभ्यः प्रोक्तं यत् अन्वेषण-रक्षण-अभियाने कापि शिथिलता न क्रियेत्, उपलब्धानां सर्वेषाम् आवश्यक-संसाधनानाञ्च उपयोगं कृत्वा अभियानं प्राथमिकता-आधारेण पूर्णं विधीयताम्।

### नदी-उपनदीभ्यः दूरे तिष्ठन्तु-

तेन स्थानीय-जनेभ्यः अपि प्रार्थना कृता यत् महतीं वर्षां नदी-उपनदीनां वर्धितं जलस्तरं च अवलोक्य नदी-उपनदीभ्यः तीव्र-प्रवाह-युक्तेभ्यः स्थानेभ्यश्च दूरे तिष्ठन्तु, प्रशासनेन प्रसारितानां सुरक्षा- निर्देशानां च पालनं कुर्वन्तु।

# अशीतितमे स्वातन्त्र्यदिवसे मिथिला-चित्रकला-सहित-ई-वाणिज्य-जालपुटस्य शुभारम्भः

## १०८ मीटरदीर्घा रामायण-आधारिता मिथिला-चित्रकला विश्वकीर्तिमानं रचितवती






**मधुबनी, १५ अगस्त २०२६। राघव नाथ झा**

अशीतितमस्य स्वातन्त्र्यदिवसस्य पावन-अवसरे मिथिलायाः समृद्धां कलां, संस्कृतिं परम्पराञ्च आधुनिक-डिजिटल-प्रौद्योगिक्या सह संयोजयितुम् एका महत्त्वपूर्णा योजना आरब्धा, यस्यान्तर्गतं मिथिला-चित्रकला-सहित-ई-वाणिज्य-जालपुटस्य विधिवत् उद्घाटनं सम्पन्नम्। अस्य कार्यक्रमस्य मुख्यं केन्द्रबिन्दुः रामचरितमानसस्य आधारेण निर्मिता १०८ मीटरदीर्घा विशाला मिथिला-चित्रकला आसीत्, यस्यां सम्पूर्ण-रामायणकथा पारम्परिक-मिथिला-शैल्या ५२ विषयवस्तुभिः निरूपिता वर्तते।

प्रायः १८० कलाकाराणां सहभागेन चतुर्षु दिनेषु साकारं जातम् ऐतिहासिकं सृजनम्

अस्याः १०८ मीटरदीर्घायाः विशाल-कलाकृतेः निर्माणं मिथिला-चित्रकला-संस्थानस्य प्रायः १८० वर्तमानैः पुरातनैश्च छात्र-छात्रैः मिलित्वा कृतम्। दिनचतुष्टयस्य सामूहिक-सृजनात्मक-प्रयासेन रामायणस्य प्रमुखाः प्रसङ्गाः मिथिला-चित्रकलायाः पारम्परिक-वर्णैः, रेखाभिः, प्रतीकैरंकन-शैल्या च जीवन्ततां प्राप्ताः।

अस्य ऐतिहासिक-निर्माणस्य मार्गदर्शनं नेतृत्वञ्च संस्थानस्य त्रिभिः पद्मश्री-पुरस्कृत-कलाकारैः— पद्मश्री बौआ देवी (वरिष्ठाचार्या), पद्मश्री दुलारी देवी (आचार्या), पद्मश्री शिवन पासवानः तथा च डॉ. रानी झा, श्री सञ्जयकुमार-जायसवालः, श्री प्रतीक-प्रभाकरः (कनिष्ठाचार्यः) च अकुर्वन्।

चित्रनिर्माणकाले चित्राङ्कनेन सह रामचरितमानसस्य श्लोकानां दोहानाञ्च पाठः अपि कृतः, येन इयं प्रस्तुतिः दृश्य-कलायाः, साहित्यस्य, आध्यात्मिक-परम्परायाः मिथिला-लोकसंस्कृतेश्च एकः अनुपमः सङ्गमः सञ्जाता।

‘वर्ल्ड रिकॉर्ड यूनियन’ इत्यनेन कृतं प्रमाणीकरणम्

अस्याः १०८ मीटरदीर्घायाः ऐतिहासिक-कलाकृतेः ‘वर्ल्ड रिकॉर्ड यूनियन’ संस्थायाः प्रतिनिधि-श्री-क्रिस्टोफर-महोदयस्य उपस्थितौ विधिवत् लोकार्पणं प्रमाणीकरणञ्च अभवत्। अस्मिन् अवसरे संस्थायाः प्रतिनिधिना मधुबनी-मण्डलस्य जिलापदाधिकारिणे विश्वकीर्तिमानस्य प्रमाणपत्रं पदकञ्च समर्पितम्।

इयं उपलब्धिः मिथिला-कलायाः प्रतिभां राष्ट्रिय-अन्तर्राष्ट्रिय-स्तरे प्रतिष्ठापयितुं महत्त्वपूर्णं सोपानम् अस्ति। साम्प्रतं इयं कलाकृतिः मिथिला-ललित-कला-सङ्ग्रहालयस्य दीर्घायां प्रदर्शिता वर्तते, यत्र कलाप्रेमिणः सामान्यजनाश्च एताम् अवलोकयितुं शक्नुवन्ति।

### गणमान्य-अतिथीनां विचाराः

माननीयः राज्यसभा-सांसदः श्री सञ्जयकुमार झाः मिथिलायाः कला-संस्कृति-परम्परायाः प्रशंसाम् अकरोत्। सः अवदत् यत् मिथिला-चित्रकला केवलम् एका कला नास्ति, अपि तु अस्य क्षेत्रस्य सांस्कृतिकी पहिचानः लोकजीवनस्य जीवन्ता अभिव्यक्तिश्च अस्ति।

माननीया भवननिर्माण-मन्त्रिणी (बिहार-सर्वकारः) श्रीमती लेसी सिंहः कलायाः संरक्षणे, संवर्धने प्रचारे च बलं प्रदत्तवती। सा न्यवेदयत् यत् रामायणस्य सम्पूर्णगाथां मिथिला-शैल्यां एतावति विशाले रूपे प्रस्तुतीकरणं कलाकाराणां प्रतिभायाः परिश्रमस्य सांस्कृतिक-निष्ठायाश्च श्रेष्ठम् उदाहरणम्।

जिलाधिकारी श्री आनन्द शर्माः सः अवदत् यत् इयं १०८ मीटरदीर्घा कलाकृतिः मिथिलायाः समृद्ध-परम्पराम् उन्नतं स्थानं प्रयच्छति। मण्डल-प्रशासनस्य मुख्यं लक्ष्यं स्थानीय-कलाकाराणां कृते आधुनिक-तन्त्रज्ञानस्य विशाल-विपणेश्च द्वारोद्घाटनम् अस्ति।

### ई-वाणिज्य-जालपुटम् : ‘स्थानीय-कलातः वैश्विक-विपणिं प्रति’

जिलाधिकारिणः परिकल्पनानुसारं मिथिला-चित्रकला-संस्थानस्य मार्गदर्शनेन निर्मितस्य ‘मिथिला-चित्रकला-सह-ई-वाणिज्य-जालपुटस्य’ (E-Commerce Portal) लोकार्पणं जातम्। अस्य डिजिटल-मञ्चस्य माध्यमेन मिथिलायाः कलाकाराः स्वकीयानि चित्राणि हस्तशिल्पोत्पादनानि च देश-विदेशस्य विशाल-विपणौ साक्षात् विक्रेतुं शक्ष्यन्ति। अनेन कलाकाराः उचितं मूल्यं, नूतनान् ग्राहकान् स्वावलम्बनञ्च प्राप्स्यन्ति। कार्यक्रमे मिथिला-चित्रकला-संस्थानस्य विविध-पाठ्यक्रमेषु प्रथम-, द्वितीय-, तृतीय-स्थानं प्राप्तवन्तः तथा सर्वाधिक-उपस्थितिं धारयन्तः मेधाविनः छात्राः अपि पुरस्कृताः अभवन्।

# अग्निवीरेभ्यो विदेशेषु जीविकया उपनलकर्मचारिणः - जोशी

**हिमसंस्कृतवार्ताः- हल्द्वानी**

सैनिककल्याणमन्त्री गणेशजोशी अद्य हल्द्वानीनगरे कुमाऊँमण्डलस्य नवनिर्मितस्य उपनलकार्यालय-भवनस्य उद्घाटनम् अकरोत्। प्रायः सार्धैककोटिरूप्यकाणां व्ययेन निर्मितेन अस्मिन् भवने पूर्वसैनिकेभ्यः, तेषाम् आश्रितेभ्यः तथा उपनलेन सम्बद्धेभ्यः कार्मिकेभ्यः उत्तमाः सुविधाः उपलब्धाः भविष्यन्ति। अस्मिन् अवसरे सैनिककल्याणमन्त्री गणेशजोशी अवदत् यत् हल्द्वानी कुमाऊमण्डलस्य प्रवेशद्वारम् अस्ति तथा च अत्र बहुसङ्ख्यकाः पूर्वसैनिकाः तेषां परिजनाश्च निवसन्ति। अतः उपनलस्य सुसज्जितं सुविधासम्पन्नं च कार्यालयम् आवश्यकम् आसीत्।सः अवदत् यत् पूर्वं उपनलकार्यालयं लघुकक्षे सञ्चालितं भवति स्म, यस्य कारणेन पूर्वसैनिकानां अन्येषां जनानां च कठिनताः भवन्ति स्म। नूतनस्य भवनस्य निर्माणेन एतासां समस्यानाॅं समाधानं भविष्यति। सैनिककल्याणमन्त्री गणेशजोशी अवदत् यत् उपनलस्य माध्यमेन प्रदेशे सर्वत्र पूर्वसैनिकेभ्यः तेषाम् आश्रितेभ्यश्च रोजगारः प्रदीयते। अधुना विदेशेष्वपि रोजगारस्य अवसरान् उपलब्धान् कर्तुं दिशि प्रयासाः क्रियन्ते। सः अवदत् यत् विदेशेषु मानवशक्तेः पर्याप्ता आवश्यकता अस्ति तथा च अस्मिन् विषये वार्ता प्रचलति। आशा अस्ति यत् आगामीमासस्य अन्तः विदेशसेवासम्बद्धा प्रक्रिया प्रारप्स्यते। अस्याः सुविधायाः लाभः पूर्वसैनिकेभ्यः, तेषाम् आश्रितेभ्यः तथा अन्येभ्यः योग्येभ्यः युवभ्यश्च अपि भविष्यति।

सैनिककल्याणमन्त्री घोषितवान् यत् अग्निवीरेभ्यः अपि विदेशेषु रोजगारस्य अवसराः उपलब्धाः कारयिष्यन्ते। एतदर्थं प्रायः पञ्चाशत्प्रतिशतम्



अग्निवीरान् उपनलस्य माध्यमेन विदेशेषु रोजगारैः सम्बद्धान् कर्तुं दिशि प्रयासाः क्रियन्ते।

अस्मिन् अवसरे मण्डीअध्यक्षः अनिलडब्बूः, दर्जामन्त्री गम्भीरधामी, उपनलस्य प्रबन्धनिदेशकः ब्रिगेडियर् निवृत्तः जे.एन.एस.बिष्टः, कर्नल गोविन्दसिंहः, कर्नल आलोकपाण्डेयः, कर्नल रमेशअधिकारी इत्यादयः अन्ये गणमान्याः जनाः उपस्थिताः आसन्।

# कण्वनगर्यां नगरायुक्तमहोदयेन क्रीडकाः सम्मानिताः



## क्रीडकानां सम्मानं देशस्य सम्मानम् - "शाह"

हिमसंस्कृतवार्ताः- उत्तराखण्डम्। कोटद्वारस्य तड़ियालचतुष्पथि के. प्राइड मॉलमध्ये स्थिते मङ्गलम्-सभागारे भारतभूमि-न्यासेन, "रैबार पहाड़ का" इत्यनेन वार्तापटलेन तथा के. प्राइड मॉल् इत्येतेषां संयुक्ततत्त्वावधाने क्रीडक- सम्मान- समारोहः आयोजितः। अस्मिन् कार्यक्रमे मुख्यातिथिरूपेण उपस्थितेन नगरायुक्तेन श्रीमता पी.एल.शाह महोदयेन उत्कृष्टप्रदर्शनं कृतवन्तः क्रीडकाः सम्मानिताः।देहरादूननगरे आयोजितायां पञ्चदशोत्तराखण्ड- राज्य-वुशु-क्रीडाप्रतियोगितायां स्वर्णपदकं विजितवती आकांक्षा पोखरियालबालिका, जॉर्जियादेशे आयोजिते बटुमि- ओपन- अन्ताराष्ट्रिय- वुशु- क्रीडाप्रतियोगितायां तृतीयस्थानं प्राप्तवान् कांस्यपदकविजेता शिवांशु पोखरियाल, देहरादूननगरे आयोजितायां षड्विंशति- उत्तराखण्ड- राज्य- शक्त्युत्थापन- क्रीडाप्रतियोगितायां सुवर्णपदकं तथा कांस्यपदकं विजितवान् ऋतिकः, नेपालदेशे आयोजितायाम् इण्डो-नेपाल- क्रीडाप्रतियोगितायां सुवर्णपदकं विजितवती सृष्टिः सैनी च नगरायुक्तेन सम्मानिताः।

एतेषां क्रीडकानां प्रशिक्षकाः नितिननेगी, चिन्तनरावतः तथा क्रीडकानां परिजनाः अपि मुख्यातिथिना पी.एल.शाह महोदयेन सम्मानिताः। नगरायुक्तेन क्रीडकानां उज्ज्वलभविष्याय शुभकामनाः प्रदत्ताः तथा तेषां क्रीडाक्षेत्रे प्राप्तानां उपलब्धीनां प्रशंसा कृता। तैः कथितं यत् क्रीडकानां सम्मानं देशस्य सम्मानम् इति ।

अवसरेऽस्मिन् के. प्राइड मॉल इत्यस्य अध्यक्षः चन्द्रप्रकाशशर्मा, पदमपुर-गैस-एजेन्सी-स्वामी भुवनेशकुंजः, कार्यक्रमस्य संयोजकः चन्द्रमोहन जदली, पूर्वप्रधानाचार्यः रमाकान्त कुकरेती, शिक्षकः पवनरावतः, संस्कृताचार्यः कुलदीप मैन्दोला, राज्य-आन्दोलनकारी विजयध्यानी, पूर्वजिलापञ्चायतसदस्यः, सम्प्रति काण्डाग्रामस्य क्षेत्रपञ्चायतसदस्या सरिता पोखरियालवर्या, दिनकरपोखरियालः, मोहराक्षेत्रस्य क्षेत्रपञ्चायतसदस्यः नवीननेगी, दर्थाग्रामस्य ग्रामप्रधानः रिंकीनेगी, वॉरियर अकादमी- प्रशिक्षकः नितिननेगी, सोनी भारद्वाजः, सोनी जोशी, बीना जुयालः, सम्पत्तिध्यानी, रीताध्यानी, लक्ष्मी रावतः, हेमलता नेगी, सन्तोषी रावतः, सुमनद्विवेदी, रामेश्वरी नेगी, बबीता सैनी, नीलमरावतः, सतेश्वरी जदली, मायारामजदली इत्यादयः अनेकाः गणमान्याः जनाः उपस्थिताः आसन्। कार्यक्रमस्य सञ्चालनं संस्कृताचार्येण कुलदीप मैन्दोला-महोदयेन कृतम्। समारोहः क्रीडकानां प्रतिभायाः सम्माननेन तथा तेषाम् उज्ज्वलभविष्यस्य मंगलकामनाभिः सह सम्पन्नः।

# स्वातन्त्र्यदिने गान्धी-क्रीडाङ्गणे दृष्टं बिहारस्य परिवर्तमानं कृषिरूपम्

## 'दक्षा तन्त्रविद्या, प्रबुद्धः कृषीवलः: अङ्कीयकृषिः नूतनबिहारस्य वैशिष्ट्यम्'

पाटलिपुत्रम् (हिमसंस्कृतवार्ता)

प्रेषकः राघव नाथ झा। स्वातन्त्र्यदिवसस्य पावनपर्वणि पाटलिपुत्रस्थे ऐतिहासिक-गान्धी-क्रीडाङ्गणे समायोजिते राज्यस्तरीयसमारोहे बिहारस्य विकासयात्रां प्रदर्शयन्ती चित्ताकर्षिका झांकी (स्तब्धचित्रम्) सर्वेषां ध्यानम् आकृष्टवती। अस्यां झांक्यां राज्यस्य परिवर्तमाना कृषिव्यवस्था, कृषकाणां जीवने आधुनिकतन्त्रज्ञानस्य वर्धमाना भूमिका, तथा अङ्कीयकृषेः (डिजिटल-कृषेः) माध्यमेन कृषिसंबद्धाः सेवाः सरलाः, पारदर्शिकाः, सुलभतया प्राप्याश्च कर्तुं क्रियमाणाः प्रयासाः प्रमुखतया प्रदर्शिताः।

'दक्षा तन्त्रविद्या, प्रबुद्धः कृषीवलः: अङ्कीयकृषिः नूतनबिहारस्य वैशिष्ट्यम्' इति सन्देशेन सह प्रदर्शिता इयं झांकी प्रादर्शयत् यत् अद्यतनः बिहारस्य कृषकः पारम्परिककृष्या सह चलभाष-यन्त्रैः, जीपीएस-तन्त्रज्ञानेन, उपग्रह-प्रविधिना, द्रोण-यन्त्रैः तथा अङ्कीय-मञ्चैश्च युज्यते। सर्वकारः निरन्तरं प्रयतते येन कृषिविषयिकाः सूचनाः, योजनाः, सेवाश्च समये कृषकाणां हस्तं प्राप्नुयुः।

चतुर्थ-कृषि-मार्गचित्रे अङ्कीयकृषेः प्राधान्यम्

बिहारसर्वकारेण चतुर्थ-कृषि-मार्गचित्रे अङ्कीयतन्त्रज्ञानस्य प्रयोगः प्राधान्येन स्वीकृतः, येन कृषककेन्द्रिताः सेवाः सरलाः, पारदर्शिन्यः, समयबद्धाश्च भवेयुः। झांकी-माध्यमेन सन्देशः दत्तः यत् अङ्कीयतन्त्रज्ञानं केवलं कृषेः आधुनिकीकरणं न करोति, अपितु सर्वकार-कृषकयोः मध्ये समन्वयम् अपि सुदृढं विदधाति।







# पञ्चपञ्चाशत्-लक्षाधिकेभ्यः कृषकेभ्यः कृषकप्रमाणपत्रम्

झांक्यां कृषक-पञ्जीकरणव्यवस्था विशेषरूपेण प्रदर्शिता। राज्ये अधुना यावत् ५५.५० लक्षाधिकेभ्यः कृषीवलेभ्यः विशिष्टा अङ्कीया 'फार्मर आईडी' प्रदत्ता वर्तते। अनया अभिज्ञान-पत्रिकया कृषकाः विविधाभिः सर्वकारीय-योजनाभिः साक्षात् संयोज्यन्ते, येन योजनानां वितरणं प्रभावशालि पारदर्शकं च भविष्यति।

## 'बिहार-कृषि-अनुप्रयोगः' सञ्जातः कृषकाणां डिजिटल-सखा

झांक्यां चलभाष-माध्यमेन कृषिसंबद्धाः सेवाः उपयुञ्जानः कृषकपरिवारः प्रदर्शितः। 'बिहार-कृषि-अनुप्रयोगः' कृषकेभ्यः एका प्रमुखी अङ्कीया व्यवस्था वर्तते। अस्य अनुप्रयोगस्य माध्यमेन कृषकाः स्वचलभाषे एव कृषिसंबन्धि-सूचनाः, सर्वकारीय-सेवाः, योजनानां च लाभं प्राप्तुं शक्नुवन्ति। राज्ये षोडश-लक्षाधिकाः (१६,००,०००+) कृषकाः अनेन सह सम्बद्धाः सन्ति।

अङ्कीय-सस्य-सर्वेक्षणं द्रोणतन्त्रज्ञानं च

उपग्रह-जीपीएस-तन्त्रज्ञानेन क्षेत्राणां सस्यानां च यथार्थस्थिति-सङ्कलनं सत्यापनं च कर्तुं अङ्कीय-सस्य-सर्वेक्षणस्य प्रदर्शनं कृतम्। द्रोणयन्त्राणि, उपग्रहाः, तथा सञ्चारजालं कृषिक्षेत्रे नवीनां क्रान्तिम् आनयन्ति। एतेन सस्यानां स्वास्थ्य-निरीक्षणं, संसाधन-प्रबन्धनं, सेवानां सुगमप्राप्तिश्च सम्भवा जाता। गान्धी-क्रीडाङ्गणे प्रदर्शिता इयं झांकी केवलं तन्त्रज्ञानस्य प्रदर्शनं नासीत्, अपितु कृषकान् नवयुवकांश्च पारम्परिककृष्या सह आधुनिकतन्त्रज्ञानेन संयोजयितुं, बिहारस्य कृषि-सशक्तीकरणाय च एकः सशक्तः सन्देशः आसीत्।

# संस्कारभारती- बोकारो- जनपदैककया 'वन्दे मातरम्' गीतस्य सामूहिकगान- सामूहिक- नृत्यप्रतियोगितायोजिता



### प्रतिभागिभिः मधुरगायनेन मनोहारिनृत्य प्रस्तुतिभिश्च वातावरणं रमणीयं कृतम्।

हिमसंस्कृतवार्ताः:- सौरभः दे बोकारो। कला-साहित्ययोः अखिलभारतीयसंस्था संस्कारभारत्याः बोकारो-जनपदैककया रविवासरे सेक्टर-४-स्थिते कैराली स्प्रिंगडल विद्यालये 'वन्दे मातरम्' गीतस्य रचनायाः १५० वर्षाणां पूर्तेः उपलक्ष्ये सामूहिकगान-सामूहिक- नृत्यप्रतियोगितायाः आयोजनं कृतम्। 'वन्दे मातरम्' गीतं विषयमाधारीकृत्य आयोजितेऽस्मिन् कार्यक्रमे विभिन्नविद्यालयानां छात्रैः छात्राभिश्च मधुरगायनेन मनोहारिनृत्यप्रस्तुतिभिश्च उपस्थितानां मनांसि हृतानि।

कार्यक्रमस्य उद्घाटनं बोकारोनगरस्य पूर्वविधायकः वरिष्ठः भाजपानेता च बिरञ्चिनारायणः, विशिष्टातिथिः सीआरपीएफ-संस्थायाः उपसेनानायकः अरविन्दकुमारः, कैराली स्प्रिंगडल विद्यालयस्य अध्यक्षः शशिइन्द्रन करात्, महासचिवः कृष्णकुमारः, प्रधानाचार्या रूमा कुमारी, संस्कारभारती-बोकारो-जनपदस्य अध्यक्षः अमरजीसिन्हा, महासचिवः स्वरूपशेखरपाण्डेयः च संयुक्तरूपेण दीपप्रज्वालनेन कृतवन्तः। कार्यक्रमस्य प्रारम्भः संस्कारभारत्याः ध्येयगीतस्य "साधयति संस्कारभारती भारते नवजीवनम्..." इति सामूहिकगायनेन अभवत्। ततः आयोजक- विद्यालयस्य कैराली स्प्रिंगडलस्य छात्राभिः सुन्दरं नृत्यं प्रस्तुतम्।

'वन्दे मातरम्' सामूहिकगानप्रतियोगितायां श्री अय्यप्पा पब्लिक विद्यालयः, गुरु गोविन्द पब्लिक विद्यालयः, सेक्टर-५, चिन्मय विद्यालयः, बोकारो, आदर्श विद्या मन्दिरम्, चास तथा कैराली स्प्रिंगडल विद्यालयस्य छात्राः भागं गृहीतवन्तः। सामूहिकनृत्यप्रतियोगितायां श्री अय्यप्पा पब्लिक विद्यालयः, चिन्मय विद्यालयः, कैराली स्प्रिंगडल विद्यालयस्य छात्राः सहभागितां कृतवन्तः। श्रेष्ठप्रदर्शनस्य आधारेण सामूहिकगान-प्रतियोगितायां गुरु गोविन्द पब्लिक विद्यालयः प्रथमं, चिन्मय विद्यालयः द्वितीयं तथा श्री अय्यप्पा पब्लिक विद्यालयः तृतीयस्थानं प्राप्तवन्तः। सामूहिकनृत्यप्रतियोगितायां श्री अय्यप्पा पब्लिक विद्यालयः प्रथमं, चिन्मय विद्यालयः द्वितीयं तथा कैराली स्प्रिंगडल विद्यालयः तृतीयं स्थानं प्राप्तवान्।

प्रतियोगितायाः निर्णायकमण्डले अमरजी सिन्हा, प्रसेनजीत शर्मा, डॉ. मंजरी श्रीवास्तवः, श्रीपर्णा घोष तथा रजनी पाढ़ी च आसन्।

मुख्यातिथिः बिरञ्चिनारायणः अस्य मनोरमस्य आयोजनस्य कृते संस्कारभारतीं तथा आयोजकविद्यालयं प्रशंसितवान्। सः उक्तवान् यत् बङ्किमचन्द्रचट्टोपाध्यायस्य 'आनन्दमठ' इति कृतिः 'वन्दे मातरम्' गीतस्य आत्मा अस्ति। प्रतिभागिभिः छात्रैः यथा गायन-नृत्ययोः प्रस्तुतयः कृताः, ताः अत्यन्तं प्रशंसनीयाः आसन्। विशिष्टातिथिः उपसेनानायकः अरविन्दकुमारः अपि देशभक्तिभावनया ओतप्रोतानां सर्वासां प्रस्तुतिनां प्रशंसां कृतवान्।

अस्मिन् अवसरे मुख्यातिथिना बिरञ्चिनारायणेन राष्ट्रपतेः हस्तेन पूर्वं सम्मानितः संस्कारभारत्याः प्रान्तीयचित्रकलाप्रमुखः सरोजमिश्रः शालं प्रदाय सम्मानितः। अध्यक्षः अमरजी सिन्हा तथा महासचिवः स्वरूपशेखरपाण्डेयः च आयोजनस्य सफलतायै सर्वेभ्यः प्रतिभागिविद्यालयेभ्यः तथा आयोजक-स्प्रिंगडल- विद्यालयस्य प्रबन्धनाय कर्मचारिभ्यश्च कृतज्ञतां ज्ञापितवन्तौ। कार्यक्रमस्य कुशलं सञ्चालनं संयोजनं च क्रान्ति श्रीवास्तवेन कृतम्। धन्यवादज्ञापनं कैराली स्प्रिंगडल विद्यालयस्य प्रधानाचार्यया रूमा कुमारीवर्यया कृतम्। अस्मिन् अवसरे संस्कारभारती-बोकारो-जनपदस्य उपाध्यक्षः रामाशीषसिंहः, मन्त्री अर्चना चौधरी, साहित्यकलाप्रमुखः अरुणपाठकः, नाट्यप्रमुखः शम्भु झा, कोषाध्यक्षः रूपकपाण्डेयः, नृत्यप्रमुखा रजनी पाढ़ी, चित्रकलाप्रमुखः नागेन्द्रसिंहः, तथा जयन्तीसिंहः, डॉ. रञ्जना श्रीवास्तवः, गीताकुमारी, अनिलकुमारश्रीवास्तवः, राजेशकुमारचौधरी, संजीवमजूमदारः, पूर्णेन्दुपुष्पेशः, शङ्करकुमारप्रजापतिः, रूपककुमारझा, स्वप्नकुमारः इत्यादयः बहवः संगीतकलाप्रेमिणः उपस्थिताः आसन्।

# संस्कृतभारती-बोकारो-जनपदेन जिलास्तरीय- संस्कृतभाषण- कूटप्रश्नोत्तरी-प्रतियोगितयोः आयोजनम्



**हिमसंस्कृतवार्ताः:- सौरभः दे** अखिलभारतीयसंस्था संस्कृतभारती, बोकारो- जनपदस्य तत्वावधाने सेक्टर-४, बोकारो-स्थिते मिथिला पब्लिक एकेडमी विद्यालये जिलास्तरीय "संस्कृतभाषणप्रतियोगिता" तथा "संस्कृतकूटप्रश्नोत्तरीप्रतियोगिता" च सफलतया आयोजिते। कार्यक्रमस्य शुभारम्भः भगवत्याः सरस्वत्याः तथा स्वर्गीय- पण्डित- रामप्रतापदुबे-महोदयस्य चित्रयोः पुष्पार्पणेन दीपप्रज्वालनेन च अभवत्। उद्घाटनसमारोहे मिथिला पब्लिक एकेडमी विद्यालयस्य अध्यक्षः राजेन्द्रकुमारः, सचिवः दिलीपकुमारझा, प्रधानाचार्यः अमरप्रसादः, संस्कृतभारत्याः अध्यक्षः डॉ. रामनारायणसिंहः तथा संस्कृतस्य मूर्धन्यविद्वान् पण्डितः देवनाथमिश्रः च उपस्थिताः आसन्। एतेषां करकमलैः माल्यार्पणं दीपप्रज्वालनं च सम्पन्नम्। उदितपाण्डेयः, सौरभदे तथा ब्रजेशकुमारझा च वैदिकमन्त्राणां सस्वरपाठेन कार्यक्रमस्य शुभारम्भं कृतवन्तः। कार्यक्रमस्य आयोजकः लोकप्रियः समाजसेवी तथा संस्कृतभारत्याः संरक्षकः सन्तोषकुमारदुबेः अपि गरिमामयी उपस्थितिं दत्तवान्। उद्घाटनावसरे स्वकीयसम्बोधने मिथिला पब्लिक एकेडमी विद्यालयस्य अध्यक्षः राजेन्द्रकुमारः संस्कृतस्य प्राचीनतां, व्यापकतां, उपयोगितां, महत्त्वं सार्वभौमिकतां च प्रकाशयन् अवदत्— "संस्कृतं भारतीयसमाजस्य संजीवनी अस्ति। संस्कृतं भारतीयसंस्कृतेः संस्काराणां च स्पन्दनम् अस्ति। संस्कृतस्य विना संस्काराः न अधिगन्तुं शक्यन्ते तथा संस्कृतस्य विना समाजः निष्प्राणः भवति।" अतः समाजस्य सफलतायै सशक्तीकरणाय च, शिक्षार्थिषु संस्काराणां स्थापनाय, भारतमातुः वैश्विकप्रतिष्ठायै च संस्कृतस्य प्रचारः प्रसारः समर्थनं सहयोगश्च अत्यावश्यकः इति सः प्रतिपादितवान्। संस्कृतं यः स्वीकरोति, सः भारतीयसमाजस्य संस्कृतेश्च परमसेवकः मन्यते इति सः उक्तवान्।

अस्मिन् अवसरे कार्यक्रमस्य आयोजकः जनप्रियः समाजसेवी सन्तोषकुमारदुबेः स्वकीयपितुः स्वर्गीय-रामप्रतापदुबे-महोदयस्य व्यक्तित्वं कृतित्वं च सभायै परिचितवान्। तस्य स्मृतौ एताः संस्कृतप्रतियोगिताः आयोज्यन्ते। संस्कृतस्य प्रचारप्रसाराय स्वर्गीय-रामप्रतापदुबे-महोदयस्य महत्त्वपूर्णं योगदानम् आसीत्। सः स्वजीवनस्य कणं कणं क्षणं क्षणं च संस्कृताय, संस्कृतेः समाजस्य च सेवायै समर्पितवान्। अतः तादृशस्य पितुः स्मरणम् अस्य कार्यक्रमस्य माध्यमेन कृतं तस्य प्रति सच्ची श्रद्धाञ्जलिः एव इति श्री दुबेः उक्तवान्।

किशोरवर्गस्य कूटप्रश्नोत्तरी-प्रश्नमञ्चस्य संचालनकार्ये उदितपाण्डेयः, डॉ. विनयपाण्डेयः, डॉ. प्रमोदकुमारशुक्लः रञ्जनपाण्डेयः च सक्रियं प्रशंसनीयं च योगदानं दत्तवन्तः। तरुणवर्गस्य प्रश्नमञ्चस्य संचालनकार्ये डॉ. रञ्जितझा, डॉ. शशिकान्तपाण्डेयः, डॉ. बृजेशत्रिपाठी, सोनिकाकुमारी च महत्त्वपूर्णं योगदानं दत्तवन्तः। संस्कृतभारती-बोकारो-जनपदस्य सहमन्त्री डॉ. आत्मानन्दसिंहः 'ऋषि' इति विषयविशेषज्ञस्य रूपेण कार्यक्रमे उपस्थितः आसीत्। संस्कृतभारती- धनबादक्षेत्रस्य संयोजकः डॉ. विनयकुमारपाण्डेयः आगतानां अतिथीनां, विभागस्य छात्राणां च हृदयपूर्वकं स्वागतं सम्मानं च कृतवान्। श्लोकपाठप्रतियोगिता, समूहगानप्रतियोगिता, भावनृत्यप्रतियोगिता, कूटप्रश्नोत्तरीप्रतियोगिता, भाषणप्रतियोगिता एतेषां सर्वासां प्रतियोगितानां विजेतृप्रतिभागिनः ३० अगस्तदिनाङ्के, रविवासरे, प्रातः १०:०० वादने डीपीएस बोकारो विद्यालयस्य सभागारे आयोजिते विशेषकार्यक्रमे सम्मानिताः भविष्यन्ति।

# महर्षि महेशयोगीवैदिकविश्वविद्यालये हर्षोल्लासेन आचरितः स्वातन्त्र्यदिवसः



हिमसंस्कृतवार्ता कटनी। महर्षि महेशयोगीवैदिकविश्वविद्यालये, करौन्दी, कटनी मध्यप्रदेशे १५ अगस्त २०२६ दिनाङ्के अशीतितमः स्वातन्त्र्यदिवसः राष्ट्रभक्त्या गरिमापूर्णे च वातावरणे हर्षोल्लासेन आचरितः। कार्यक्रमे विश्वविद्यालयस्य कुलसचिवः श्रीसन्दीपशर्मा, शिक्षकाः, अधिकारिणः, कर्मचारिणः,शोधार्थिनः छात्राः च उपस्थिताः आसन्। कार्यक्रमस्य शुभारम्भः भारत मातुः पूजया, वीरसैनिकेपुष्पञ्जल्या च अभवत्। विश्वविद्यालयस्य माननीयकुलसचिवेन श्रीसन्दीपशर्मणा ध्वजारोहणं कृतम्। ततः सर्वैः सामूहिकरूपेण राष्ट्रगानं गीतम्। उपस्थितजनैः राष्ट्रस्य एकतायाः, अखण्डतायाः, सार्वभौमत्वस्य च रक्षणाय स्वप्रतिबद्धता प्रकटिता। कार्यक्रमे स्वातन्त्र्यसंग्रामस्य अमरवीरान् राष्ट्रनायकांश्च श्रद्धया स्मृत्वा तेषां त्यागं बलिदानं च स्मरितम्। वैदिकज्ञानपरम्परया सह राष्ट्रनिर्माणस्य आह्वानं कृतम्। अस्मिन् अवसरे विश्वविद्यालयस्य कुलाधिपतयः डॉ. ब्रह्मचारिगिरीशचन्द्रवर्मामहोदयेन स्वातन्त्र्यदिवसस्य शुभकामनाः प्रदाय स्वीयं सन्देशम् अवदत् यत् भारतस्य वास्तविकं बलं प्राचीनायां वैदिकज्ञानपरम्परायां, संस्कृतौ, संस्कारेषु सामूहिकचेतनायां च निहितम् अस्ति।तेन छात्रेभ्यः शिक्षया सह अनुशासनं, चरित्रं, राष्ट्रप्रेम मानवतामूल्यं च जीवने स्वीकरणाय आह्वानं कृतम्। तेन उक्तं यत् ज्ञानयुताः चेतनायुक्ताः च युवजनाः एव आत्मनिर्भरस्य विकसितस्य च भारतस्य सुदृढं आधारं निर्मातुं शक्नुवन्ति इत्यवोचत्।

तदनु शिक्षकेषु कर्मचारिषु छात्रेषु च कर्तव्यस्य दायित्वबोधं कारयितुं विश्वविद्यालयस्य कुलपतिः डॉ. नरेशतिवारीमहोदयः स्वातन्त्र्यदिवसस्य शुभकामनाः प्रदाय अवदत् यत् स्वातन्त्र्यं अस्मभ्यं अधिकारैः सह स्वकर्तव्यस्य दायित्वस्य च बोधं कारयति। उक्तं च यत् विश्वविद्यालयः छात्रेभ्यः गुणवत्तापूर्णां शिक्षां प्रदातुं, तेन सह नैतिकमूल्यैः, वैज्ञानिकदृष्टिकोणेन, भारतीयसंस्कृत्या राष्ट्रस्य प्रति उत्तरदायित्वभावनया च तान् योजयितुं निरन्तरं प्रयत्नं करोति। तेन छात्राः स्वज्ञानस्य प्रतिभायाः च उपयोगं समाजस्य राष्ट्रस्य च कल्याणाय कुर्वन्तु इति आह्वानं कृतम्।

कुलसचिवेन युवकेभ्यः राष्ट्रनिर्माणे योगदानस्य आह्वानं कृतम् ध्वजारोहणस्य अनन्तरं कुलसचिवः श्रीसन्दीपशर्मामहोदयः स्वसन्देशे अवदत् यत् स्वातन्त्र्यदिवसः केवलं उत्सवस्य अवसरः नास्ति, अपितु राष्ट्रस्य प्रति स्वकर्तव्यस्य दायित्वस्य च स्मरणस्य पवित्रः दिवसः अस्ति। तेन उक्तं यत् देशस्य प्रगत्यां प्रत्येकस्य नागरिकस्य महत्त्वपूर्णं योगदानं भवति इति।तेन छात्रेभ्यः अनुशासनं, सत्यनिष्ठां, परिश्रमं राष्ट्रप्रेम चजीवनस्य भागं कृत्वा स्वशैक्षणिकसामाजिकदायित्वयोः निर्वहनाय आह्वानं कृतम्। तेन उक्तं यत् महर्षिमहेशयोगीवैदिकविश्वविद्यालयः भारतीयज्ञानपरम्परायाः, योगस्य, ध्यानस्य, संस्कारस्य आधुनिकशिक्षायाः च समन्वयेन छात्राणां सर्वांगीणविकासाय निरन्तरं कार्यं करोति।

कुलसचिवः श्रीसन्दीपशर्मा अवदत् यत् युवानां ऊर्जा, प्रतिभा, नवाचारभावना च भारतं आत्मनिर्भरं विकसितं च राष्ट्रं कर्तुं महत्त्वपूर्णां भूमिकां निर्वहिष्यति।

कार्यक्रमस्य अन्ते विश्वविद्यालयपरिवारेण राष्ट्रस्य एकतायै, अखण्डतायै, शान्त्यै, समृद्ध्यर्थम् आत्मनिर्भरतायै च पूर्णनिष्ठया कार्यं कर्तुं संकल्पः कृतः येन सुराष्ट्रणिर्माणं भविष्यति इति।

छात्राः देशस्य विकासे सक्रियभागं ग्रहीतुं तथा स्वज्ञानस्य कौशलस्य च उपयोगं समाजस्य राष्ट्रस्य च हिताय कर्तुं प्रेरिताः।

कार्यक्रमस्य समापनं राष्ट्रस्य उन्नतेः समृद्धेश्च मङ्गलकामनया अभवत् ।

## अटलबिहारीवाजपेयी-महोदयस्य पुण्यतिथौ बिहार-विधानसभाध्यक्षेण डॉ. प्रेमकुमारेण समर्पिता भावाञ्जलिः



पाटलिपुत्रम् (हिमसंस्कृतवार्ता): राघव नाथ झा। भारतरत्न-विभूषितस्य पूर्वप्रधानमन्त्रिणः श्रद्धेयस्य अटलबिहारीवाजपेयी-महोदयस्य पुण्यतिथौ बिहार-विधानसभायाः माननीयेन अध्यक्षेण डॉ. प्रेमकुमारेण तस्य चित्रे पुष्पाञ्जलिं समर्प्य भावपूर्णा श्रद्धांजलिः समर्पिता।

अस्मिन् अवसरे सः अवदत् यत् श्रद्धेयः अटलबिहारीवाजपेयी भारतीयराजनीतेः युगपुरुषः, सर्वप्रियः राजनेता च आसीत्। सः राजनीतौ शुचितायाः, लोकतान्त्रिकमूल्यानां, देशभक्तेः, मानवीयसंवेदनानां च अपूर्वः सङ्गमः आसीत्। सः स्वस्य सार्वजनिके जीवने सिद्धान्तेभ्यः राष्ट्रहिताय च सर्वदा सर्वोच्चं स्थानं दत्तवान्।

उद्बोधनस्य प्रमुखाः अंशाः: दलगत-सीमाभ्यः परं व्यक्तित्वम्: अध्यक्षः अवदत् यत् अटलमहोदयस्य व्यक्तित्वं दलगतसीमाभ्यः उपरि आसीत्। तस्य ओजस्वी-वक्तृत्वेन, विचारेण, सहजव्यवहारेण च देशस्य सर्वेषु वर्गेषु तस्य कृते महती आत्मीयता आदरश्च आसीत्। सः कुशलः प्रशासकः, प्रखरः वक्ता, संवेदनशीलः कविः, दूरदर्शी राष्ट्रनेता च आसीत्।

ऐतिहासिकानि कार्याणि: तस्य कुशलनेतृत्वे भारतेन पोखरण-परमाणुपरीक्षणम्, स्वर्णिम-चतुर्भुज-मार्गयोजना, प्रधानमन्त्री-ग्रामसडक-योजना च इत्यादयः राष्ट्रनिर्माणस्य ऐतिहासिकानि कार्याणि सम्पादितानि, येन भारतस्य वैश्विकप्रतिष्ठा नवीनामुन्नतिं प्राप्ता। अदम्यसाहसस्य प्रतीकम्: तस्य काव्यपङ्क्तिः "हारं न स्वीकरिष्यामि, नवं सङ्घर्षं विधास्यामि" तस्य अदम्यं साहसं सङ्घर्षशीलं च व्यक्तित्वं दर्शयति। आदर्शमार्गानुसरणमेव सत्याञ्जलिः: सः भौतिकरूपेण अस्माकं मध्ये नास्ति, किन्तु तस्य आदर्शाः, विचाराः, राष्ट्रसमर्पणं च सर्वदा अस्माकं मार्गदर्शकाः भविष्यन्ति। तस्य मार्गे गमनमेव तस्मै वास्तविकं नमनम्। डॉ. प्रेमकुमारः न्यवेदयत् यत् वयं सर्वे अटलमहोदयस्य आदर्शान् आत्मसात्कृत्य लोकतन्त्रस्य सुदृढीकरणाय, सुशासनाय, राष्ट्रस्य सर्वाङ्गीणविकासाय च निरन्तरं कार्यं कुर्याम। राष्ट्रं तस्य अवदानं सर्वदा कृतज्ञतया संस्मरिष्यति।

## बिहारे उत्तम-विमान-सम्पर्कतया पर्यटन-वाणिज्य-उद्योग-निवेश-रोजगार-आर्थिकगतिविधिभ्यः नूतना गतिः लप्स्यते: मुख्यमन्त्री

- **किशनगञ्ज, सारण तथा उलाव (बेगूसराय) इत्येतेषु स्थानेषु विमानपत्तनानां विकासाय तीव्रगत्या कार्यकरणाय निर्देशः**
- **औरङ्गाबाद-बाङ्का-खगड़िया-नवादा-शेखपुरा-सीतामढ़ी-मण्डलेषु नूतनानां विमानस्थलानां/हेलीपैड्-स्थानानां विकासस्य सम्भावनासु कार्यकरणाय निर्देशः**

पाटलिपुत्रम् (हिमसंस्कृतवार्ताहरः): प्रेषकः राघव नाथ झा

बिहारस्य मुख्यमन्त्रिणा सम्राटचौधरिणा 'सङ्कल्प'-सभागारे भारतसर्वकारस्य नागर-विमानन-मन्त्रालयेन अधिसूचितायाः संशोधित-'उडान'-योजनायाः (क्षेत्रीय-सम्पर्क-योजना RCS 6.0) समीक्षा कृता। अस्यां गोष्ठ्यां नागर-विमानन-विभागस्य सचिवेन नीलेशरामचन्द्रदेवरे-महोदयेन राज्ये विमान-सम्पर्कस्य विस्ताराय विस्तृतं प्रस्तुतीकरणं प्रदत्तम्।सबैया (गोपालगञ्ज), फारबिसगञ्ज (अररिया), किशनगञ्ज, सारण तथा उलाव (बेगूसराय) इत्येतेषु स्थानेषु विमानसुविधानां विकासाय आवश्यककार्याणि द्रुतगत्या चालयितुं मुख्यमन्त्रिणा आदिष्टम्।

# दीप-प्रज्वालनेन भारत-निर्वाचन-आयोगस्य (नवदेहली) माननीय-मुख्य-निर्वाचन-आयुक्तस्य श्री ज्ञानेश-कुमार-महोदयस्य परिभ्रमण-कार्यक्रमस्य अभवत् शुभारम्भः




- **मण्डलाधिकारिणा (जिलाधिकारी) श्री आनन्द-शर्मणा माननीय-मुख्य-निर्वाचन-आयुक्तः पाग-उत्तरीयेण (दुपट्टा), मिथिला-चित्रकलया तथा च स्मृतिचिह्नेन सम्मानितः**

**मधुबनी, १६ अगस्त २०२६ राघव नाथ झा**

भारत-निर्वाचन-आयोगस्य (नवदेहली) माननीयानां मुख्य-निर्वाचन-आयुक्तानां श्री ज्ञानेश-कुमार-महोदयानां परिभ्रमण-कार्यक्रमान्तर्गतम् अररिया-सङ्ग्रामे आगमनम् अभवत्।

पूर्व-निर्धारित-कार्यक्रमानुसारं भारत-निर्वाचन-आयोगस्य माननीय-मुख्य-निर्वाचन-आयुक्ताः हेलिकॉप्टर-विमानेन झञ्झारपुरस्य अररिया-सङ्ग्रामं प्राप्तवन्तः। तत्र हेलिपैड-स्थाने उपस्थिताः अधिकारिणः पुष्पगुच्छं समर्प्य तेषां स्वागतम् अकुर्वन् तथा च 'गार्ड-ऑफ-ऑनर्' (सम्मान-रक्षक-वन्दनम्) प्रदत्तवन्तः। तदनन्तरं ते अररिया-सङ्ग्रामस्थं 'मिथिला-हाट' प्रति प्रस्थिताः। मिथिला-हाट-स्थिते कार्यक्रम-स्थले मण्डलाधिकारिणा आनन्द-शर्मणा पाग-उत्तरीयाभ्यां, मिथिला-चित्रकलया तथा च स्मृतिचिह्नेन तेषां भव्यं स्वागतं कृतम्। ततः परं माननीय-मुख्य-निर्वाचन-आयुक्तेन श्री ज्ञानेश-कुमारेण, बिहारस्य मुख्य-निर्वाचन-पदाधिकारिणा, मधुबनी-मण्डलाधिकारिणा तथा च अन्यैः अधिकारिभिः सह दीप-प्रज्वालनेन कार्यक्रमस्य विधिवत् शुभारम्भः कृतः। अनन्तरं शिवगङ्गा-बालिका-उच्च-विद्यालयस्य (मधुबनी) छात्राभिः 'वन्दे मातरम्' इति राष्ट्रगीतस्य सुमधुरा प्रस्तुतिः दत्ता।

मण्डलाधिकारिणः आनन्द-शर्मणः स्वागत-भाषणानन्तरं मण्डलस्य भौगोलिक-उपलब्धीनां सहैव २०२५ वर्षे मण्डले सम्पन्नस्य एस्.आई.आर्. (मतदाता-सूची-पुनरीक्षण-कार्यस्य) विषये विस्तरेण विवरणं प्रस्तुतम्। तदनन्तरं स्थानीय-कलाकारैः पारम्परिक-लोकनृत्यस्य मनमोहिनी प्रस्तुतिः कृता। अस्मिन् अवसरे भारत-निर्वाचन-आयोगस्य माननीय-मुख्य-निर्वाचन-आयुक्तेन कार्यक्रमः सम्बोधितः। ततः परं मिथिला-परम्परायाः प्रतीकचिह्नानि तेभ्यः समर्पितानि।

अस्मिन् कार्यक्रमे माननीय-मुख्य-निर्वाचन-आयुक्तेन मिथिला-कला-शिल्पस्य तथा च ई.वी.एम. (EVM) यन्त्र-सम्बन्धि-प्रदर्शिन्याः अपि सूक्ष्मम् अवलोकनं कृतम्। अस्य कार्यक्रमस्य माध्यमेन मिथिलायाः समृद्धायाः कला-संस्कृतेः दर्शनेन सह निर्वाचन-जागरूकतायाः विविधाः आयामाः अपि प्रदर्शिताः।

# स्वातन्त्र्यदिने मुख्यमन्त्रिणः सम्राट्-चौधरिणः महती घोषणा: २०३० पर्यन्तम् एककोटि-युवकेभ्यः वृत्ति-रोजगारावसराः, आगामि-दिनाङ्के विद्यार्थी-सहयोग-जालपुटस्य (पोर्टल) शुभारम्भः






पाटलिपुत्रम् (हिमसंस्कृतवार्ता) राघव नाथ झा। अशीतितमस्य (८०) स्वातन्त्र्यदिवसस्य पावनपर्वणि पाटलिपुत्रस्थे ऐतिहासिक-गान्धी-क्रीडाङ्गणे मुख्यमन्त्री सम्राट्-चौधरी ध्वजारोहणम् अकरोत्। राज्यं सम्बोधयन् सः शिक्षा-रोजगार-उद्योग-कृषि-स्वास्थ्य-मूलभूतसंरचनासम्बद्धाः बह्व्यः प्रमुखाः घोषणाः कृतवान्। सः प्रावोचत् यत् २०३० तमवर्षं यावत् एककोटि-युवकेभ्यः सर्वकारीयवृत्तयः रोजगारावसराश्च प्रदास्यन्ते। अपि च आगामि-दिनाङ्कात् 'विद्यार्थी-सहयोग-जालपुटम्' (Student Support Portal) आरभ्यते, यत्र छात्रसमस्यानां निवारणं त्रिंशद्दिनेषु (३०) विधास्यते।

**प्रमुखाः घोषणाः निर्णयाश्च:**

रोजगारस्य लक्ष्यम्: २०३० तमवर्षं यावत् एककोटि-युवकेभ्यः सर्वकारीयाः वृत्तयः रोजगारावसराश्च दीयन्ते। विद्यार्थी-सहयोग-जालपुटम्: आगामि-दिनाङ्कात् छात्रसमस्यानिवारणाय नूतनं जालपुटम् आरभ्यते, यत्र त्रिंशद्दिनेषु समस्यापरिहारः भविष्यति।

शिक्षाक्षेत्रे नूतनव्यवस्थाः परीक्षासु पारदर्शकतायै परीक्षासुधारसमितिः, शिक्षणगुणवत्तायै उच्चस्तरीयसमितिश्च स्थाप्यते। ५५१ सरस्वती-विद्यानिकेतनेषु IIT-JEE, NEET इत्यादीनां प्रतियोगीपरीक्षाणां निःशुल्कं शिक्षणं दीयते। सर्वाणि मण्डलानि पदवीमहाविद्यालयैः संयोजितानि।

कृषिक्षेत्रे शर्करा-उद्योगश्च: राज्ये पञ्चविंशतिः (२५) नूतनाः शर्करायन्त्रागाराः (चीनी-मिल) स्थाप्यन्ते, येषु दश प्रारब्धाः, षण्मासेषु अन्याः पञ्च अपि आरप्स्यन्ते। कृषकेभ्यः दिवा विद्युतः निःशुल्कविद्युत्सम्पर्कस्य च व्यवस्था निरन्तरं स्थास्यति। ऊर्जाक्षेत्रम्: 'मुख्यमन्त्री-विद्युत्-सहायता-योजना' अन्तर्गतं प्रतिमासं १२५ मात्रकाणि (Units) निःशुल्कविद्युत् दीयते। उद्योगः निवेशश्च: बिहारे अर्धचालक-निर्माणाय (Semiconductor) 'बिहार-सेमीकण्डक्टर-नीतिः-२०२६' प्रवर्तिता।

राज्ये पञ्चलक्षकोटि-रूप्यकाणां (₹५ लक्षकोटि) निवेशलक्षावाप्तये १४,६०० एकड्-परिमिता भूमिरधिगृहीता।

स्वास्थ्यसेवाः: मण्डलीयचिकित्सालयाः 'सुपर स्पेशियलिटी'-रूपेण विकसिताः क्रियन्ते। अशीत्यधिकानां (८०+) वृद्धानां कृते गृहे एव चिकित्सासुविधा उपलभ्यते।

धार्मिकपर्यटनम्: मोकामानगरे दश-एकड्-मिते भूभागे तिरुपति-बालाजी-संस्थानेन विशालमन्दिरं निर्मास्यते। सहैव विमान-हेली-पर्यटनस्य विस्तारः भविष्यति।

मुख्यमन्त्रिणा प्रतिपादितं यत् चतुर्दशकोटि-बिहारवासिनां परिश्रमेण, कृषकाणां धैर्येण, मातृशक्तेः सङ्कल्पेन च भारतं विकसितदेशः बिहारश्च समृद्धराज्यं भविष्यति।



# श्रावणसोमवारस्य, नागपञ्चम्याः, सिंहसङ्क्रान्तेश्च त्रिवेणीसंयोगः शिवोपासनायाः नागतत्त्वाराधनायाश्च अनुपमः अवसरः



– ज्योतिषाचार्यः डॉ. राजनाथ झा
निदेशकः, ज्योतिर्वेद-विज्ञान-संस्थानम्

अस्मिन् वर्षे श्रावणमासस्य तृतीयः सोमवासरः धार्मिक-ज्योतिषीयदृष्ट्या अत्यन्तं विलक्षणं पुण्यसंयोगं समुपस्थापयति। अस्मिन् दिने श्रावणसोमवारः, नागपञ्चमी, तथा सिंहसङ्क्रान्तिः (सूर्यस्य सिंहराशिप्रवेशः)—इति त्रयाणां शुभसमागमः सञ्जातः। सनातनधर्मशास्त्रेषु ज्योतिषपरम्परायां च ईदृशः संयोगः शिवतत्त्वस्य, सूर्यतत्त्वस्य, नागतत्त्वस्य च संयुक्तोपासनायै सर्वश्रेष्ठः अवसरः मन्यते। विदुषां मते अस्मिन् दिने भगवान् शिवस्य, नागदेवस्य, भास्करस्य च आराधनेन आध्यात्मिक्याः उन्नतेः, ग्रहदोषनिवारणस्य, आरोग्यस्य, तेजसः, यशसः, समृद्धेश्च प्राप्तिः भवति।

मुख्याः अंशाः :

- श्रावणस्य तृतीये सोमवासरे नागपञ्चम्याः सिंहसङ्क्रान्तेश्च पावनः संयोगः।
- भगवतः शिवस्य, नागदेवस्य, सूर्यदेवस्य च संयुक्ताराधनायाः विशेषं महत्त्वम्।
- रुद्राभिषेकस्य, महामृत्युञ्जयमन्त्रजपस्य, नागपूजनस्य, सूर्योपासनायाश्च विशेषविधानम्।

प्रमुखेषु शिवालयेषु सूर्यमन्दिरेषु च विशेषानुष्ठानानां सज्जाः।श्रावणमासः भगवान् शिवस्य उपासनायै परमपवित्रः कालः मन्यते। विशेषतः सोमवासरे शिवलिङ्गस्य गङ्गाजलेन, दुग्धेन, बिल्वपत्रैः, धत्तूरेण, पुष्पैश्च जलाभिषेकेण कृता आराधना सर्वकामनापूर्तिं शिवकृपां च ददाति। अस्मिन् वारे नागपञ्चम्या सह सोमवासरस्य संयोगात् शिवस्य नागदेवस्य च संयुक्तोपासनायाः महत्त्वं द्विगुणीभूतम्।

नागपञ्चमी भारतीयसंस्कृतौ न केवलं धार्मिक्याः आस्थायाः पर्व, अपितु प्रकृतेः, जैववैविध्यस्य, प्राणिमात्रस्य च प्रति सम्मानस्य संरक्षणस्य च सनातनपरम्परायाः प्रतीकम् अस्ति। भगवतः शिवस्य कण्ठभूषणं नागः इमं सन्देशं ददाति यत् भयस्य, अहङ्कारस्य, विषैलाचाराणां च उपरि आत्मसंयमस्य आध्यात्मिकचेतनायाश्च विजयः एव वास्तविकं शिवत्वम् अस्ति।

अस्मिन्नेव दिने सिंहसङ्क्रान्तिः अपि वर्तते। ज्योतिषगणनानुरोधेन अस्मिन् अवसरे भगवान् सूर्यः कर्कराशेः स्वराशिं सिंहं प्रविशति। धर्मशास्त्रेषु सङ्क्रान्तिकालः दान-स्नान-जप-तप-देवपूजनेभ्यः महते पुण्याय भवति। सिंहसङ्क्रान्तौ सूर्योपासना, अर्घ्यप्रदानम्, आदित्यहृदयस्तोत्रपाठः, तथा अन्न-वस्त्र-गोसेवादिदानानि विशेषफलप्रदानि भवन्ति।

ज्योतिर्वेद-विज्ञान-संस्थानस्य निदेशकस्य ज्योतिषाचार्य-डॉ. राजनाथ-झा-महोदयस्य मते श्रावणसोमवारस्य, नागपञ्चम्याः, सिंहसङ्क्रान्तेश्च अयं त्रिवेणीसंयोगः आध्यात्मिकसाधनायै ग्रहशान्तये च अत्यन्तं महत्त्वपूर्णः वर्तते। अस्मिन् दिने रुद्राभिषेकेन, महामृत्युञ्जयमन्त्रजपेन, नागपूजनेन, सूर्यार्घ्यप्रदानेन च राहु-केतुदोषनिवारणं, कालसर्पप्रभावोपशमनम्, आत्मबलवर्धनं, कुटुम्बे सुख-समृद्धि-सकारात्मकशक्तीनां सञ्चारश्च भवतीति मान्यता वर्तते। अमुं विशेषमवसरम् अवलम्ब्य राजधानीं पाटलिपुत्रं विहाय राज्यस्य प्रमुखेषु शिवालयेषु सूर्यमन्दिरेषु च विशेषपूजायाः, रुद्राभिषेकस्य, धार्मिकानुष्ठानानां च सज्जाः क्रियन्ते।

# रणवीरसिंहः 'धुरन्धर' इति चलच्चित्रस्य अनन्तरम् अनन्या-बिरलामहोदयया सह 'ज़ॉम्बी' इत्यस्मिन् चलच्चित्रे दर्शनं दास्यति। चलच्चित्रस्य चित्रोतलनं प्रारब्धम्



हिमसंस्कृतवार्ताः- जगदीश डाभी, मुम्बई। बॉलीवुड-चित्रजगतः सुप्रसिद्धः अभिनेता रणवीरसिंहः अधुना एव 'धुरन्धर' तथा 'धुरन्धर २' इति चलच्चित्रयोः दृश्यते स्म। एते उभे अपि चलच्चित्रे पञ्चत्रिंशच्छतकोटि (३,००० कोटिः) रुप्यकाणाम् अतीव धनार्जनम् अकुरुताम्। 'धुरन्धर' इति चित्रस्य सफलतायाः अनन्तरम् रणवीरसिंहः बॉलीवुड-क्षेत्रस्य शीर्ष अभिनेतृषु गण्यते। सम्प्रति सर्वे तेन सह कार्यं कर्तुम् इच्छन्ति। अपरञ्च, रणवीरसिंहः स्वस्य अग्रिम-परियोजनायै अनन्या बिरलामहोदयया सह कार्यं कर्तुं निर्णयं कृतवान्।

'धुरन्धर' इति चित्रस्य सफलतायाः अनन्तरम् अधुना रणवीरसिंहः 'प्रलय' इति चित्रे द्रक्ष्यते। अस्य चलच्चित्रस्य निर्देशनं जय मेहता महोदयः करोति। अस्मिन् 'सुपरवुमन्' चलच्चित्रस्य 'लोका' इति पात्रवती कल्याणी प्रियदर्शना अपि मुख्यभूमिकायां दृश्यिष्यते। कथ्यते यत् एतत् एकं ज़ॉम्बी-क्रिया-रोमाञ्चकं चलच्चित्रम् अस्ति, यत् जगत्-विनाशस्य कथायाम् आधारितम् अस्ति। वार्तानुसारम्, अस्य चलच्चित्रस्य चित्रीकरणम् मुम्बय्यां प्रारब्धम्। रणवीरः चित्रीकरणे सम्मिलितः अभवत्।

'प्रलय' इति एकं बहुव्ययसाध्यं चलच्चित्रम् अस्ति। अस्य चित्रस्य कृते रणवीरसिंहः अनन्या बिरलामहोदयया सह सहयोगम् अकरोत्। अनन्या बिरला महोदयायाः 'बिरला स्टूडियोज़, हंसल मेहता, साहिल सहगलयोः 'ट्रू स्टोरी फिल्म्स', रणवीरसिंहस्य च स्वकीया निर्माणसंस्था 'मां कसम फिल्म्स' मिलित्वा अस्य बहुव्ययसाध्यस्य ज़ॉम्बी- चलच्चित्रस्य निर्माणं करिष्यन्ति।

डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्

# संस्कृत कथामञ्जरी

## "अथ विक्रमादित्यस्य सिंहासनप्राप्तिकथा"



ततः राजा विक्रमादित्यः देवब्राह्मणाय- दीनार्त्त-कुब्ज- पङ्गवादीनां मनोरथान् पूरयन् प्रजाः सम्यगपालयत्। परिचारकादीनां सन्तोषमुत्पादयन् मन्त्रिसामन्तादीनां वचनपरिपालनेन च मनोऽहरत्। एवं सकलानुरञ्जनेन राजा राज्यं करोति स्म।

ततः एकदा कश्चिद्दिगम्बरः राजसमीपमागत्य इति। इति आशीर्वादपूर्वकं राज्ञो हस्ते फलं दत्त्वा अब्रवीत्- "भो राजन्! अहं कृष्णचतुर्दश्यां महाश्मशाने अघोरमन्त्रेण हवनं करिष्यामि; तत्र त्वया उत्तरसाधकेन भवितव्यम्।" राज्ञा च प्रतिज्ञातम्। तस्य तेन प्रसङ्गेन राज्ञो वेतालः प्रसन्नो जातः, अष्टौ महासिद्धयश्च प्राप्ताः। भूतले विक्रमस्य सादृश्यं न कोऽपि बभार। त्रिभुवने अस्य कीर्तिरनर्गला गङ्गेव प्रवहति स्म।

महेन्द्रः सन्तुष्टः सन् विक्रमार्कं रत्नादिना सम्भाव्य महार्घं वररत्नखचितं सिंहासनं तस्मै ददौ। तत्सिंहासने खचिताः द्वात्रिंशत् पुत्तलिकाः सन्ति। तासां शिरसि पदं दत्त्वा तत् सिंहासनमध्यासितव्यम् तदतिमनोहरं सिंहासनमिन्द्राज्ञाश्च गृहीत्वा विक्रमार्को निजां पुरीमगमत्। तदनन्तरं शुभे मुहूर्ते शुभे लग्ने सिंहासनमधिष्ठाय राज्यं करोति स्म।



# सामी- प्रवाहक- उत्पादन- क्षमता वर्धमाना

हिमसंस्कृतवार्ताः- रविः खरिडेहालः

वर्ष २०३४ तमेन, ५- ८ अधिकाः सामी- प्रवाहक- उत्पादनसंस्थानां स्थापनायाः संकल्पितम्। तस्मिन् काले तान् न केवलं स्थापयितुम् अपि तु तान् कार्यान्वितुम् अपि संकल्पितम्। ३ प्रमुखाः उत्पादनसंस्थाः पूर्वमेव कार्यरताः सन्ति। उत्पादानां निर्यातः अपि क्रियते। अङ्कीय- उपकरणानि, चिकित्सासाधनं, परिवहनव्यवस्था च कृते सिलिकॉन-खण्डाः अनिवार्याः सन्ति। तेषां उत्पादनं भारतं विकसितस्य राजमार्गः अस्ति। विना सिलिकॉन-खण्डान् जगत् स्थगितम् भविष्यति। आत्मनिर्भारतयोजना अन्तर्गतं निर्माणक्षमता वर्धमाना अस्ति। दूरभाषयन्त्रेण सह यूपीआई च सह अङ्कीयप्रौद्योगिक्या उत्तमसेवां कृतवती अस्ति। अधुना सिलिकॉन् प्रौद्योगिक्याः अर्थव्यवस्थायाम् अधिका प्रगतिः सम्भवति।